Bal Bharati PUBLIC SCHOOL
Ganga Ram Hospital Marg, New Delhi
An Institution of Child Education Society (Regd.)

BRITISH COUNCIL International Dimension in Schools 2018–21

SHOWCASE SCHOOLS Microsoft

FIT INDIA

# संस्कृत-सौगन्धिका

अङ्कः प्रथमः **विद्यालयीया अद्वितीया संस्कृतपत्रिका** वर्षम् 2021-22

## प्राचार्यसन्देशः



श्रीमान् एल. वी. सहगलः

अद्य यदा वयम् एकविंश्यां शताब्द्यां भूमण्डलीकरणं वैश्वीकरणञ्च सम्मुखीकुर्मः तदा भारतीय-मनीषाया : विश्वव्यापकत्वमपि अस्माभिः सुतरां विश्वस्तरे परभाव्यते। भारतीयसंस्कृतेः, दर्शनस्य, रिक्थस्य च यः महत्वपूर्णः प्रभावः विश्वस्तरे विलोक्यते तत् सर्वमपि संस्कृतवाङ्मये निहितम् अस्ति । अतः विश्वस्मिन्नपि विश्वे प्रतिष्ठतेषु रिक्थेषु अन्यतमत्वेन विद्यमानस्य संस्कृत-वाङ्मयस्य योगदानम् आगामिनव्यपीठिकाया : बालकानां बालिकानां च कृते न केवलं संरक्षणस्य वर्तते महती आवश्यकता अपितुअस्माकं विकसितशिक्षाप्रणाल्या :, ऐषमः नूतनशिक्षानीतेः माध्यमेन च व्यवस्थितरूपेण शोधस्य, परिष्कारस्य, नवोन्मेषस्य, नूतनप्रयोगस्य चापि आवश्यकता वर्तते। समग्रे विश्वे परिपाल्यमानः विश्वयोगदिवसः आयुर्वेदस्य वैश्विकी मान्यता , शास्त्रीयसंगीतस्य च लोकप्रियता संस्कृतवाङ्मयस्य, प्राच्यविद्याया : च महिमानं ख्यापयन्ति । एतत् सर्वं निध्या य बालभारती पब्लिक स्कूल इति विद्यालयः प्रधानमन्त्रिणः आत्मनिर्भरभारतम् इति योजनायाः परिपूर्णार्थं देशस्यनूतनशिक्षानी तेः 2020 इत्यस्य क्रियान्वयनार्थंच तत्परम् अस्ति । विद्यालयीयसंस्कृतविभागद्वारा छात्राणां बौद्धिकता वर्धनार्थं सर्जनकर्मणि छात्राणां प्रेरणार्थं च संस्कृतसौगन्धिकापत्रिकायाः प्रकाशनं क्रियते इति महतेमोदाय कल्पते।

विद्यालयीयसंस्कृतविभागद्वारा छात्राणां बौद्धिकता-वर्धनार्थं सर्जनकर्मणिछात्राणांप्रेरणार्थं च संस्कृतसौगन्धिकापत्रिकायाः प्रकाशनं क्रियते इति महते मोदाय कल्पते।
संस्कृत-सौगन्धिकाइति पत्रिकायाःप्रकाशनम् अपि छात्राणांज्ञानवर्धनपूर्वकं भारतीयशिक्षाप्रणाल्यां विद्यालयस्य योगदानम् अतोऽपि समृद्धं करिष्यति।
अस्मिन् अवसरे अहं सर्वान् शिक्षकान्, छात्रान्, विद्यालयपरिवारं च मङ्गलवचोभिः वर्धापयामि।

## उपप्राचार्यासन्देशः



श्रीमती मीना मल्होत्रा

"भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा"

भारतीय-संस्कृतेः संरक्षिका, प्राचीनज्ञानविज्ञानयोः संवाहिका, आधुनिकभारतीयभाषाणां जननी सम्पोषिका च, मानवजीवनस्य साफल्याय अपेक्षितनैतिकमूल्यानां च विकासयित्री संस्कृतभाषा अस्माकं शिक्षाव्यवस्थायां विशिष्टं महत्त्वं विभर्ति। एषा न केवलं भारतीयभाषाणामेव अपितु वर्तते अनेकासां इण्डो-यूरोपीय- भाषाणां जननी इयं देवभाषा अधुनापि अस्माकं संस्कृतिं सभ्यतां च पोषयति। अतः अस्याः सुरभारत्याः वैशिष्ट्यम् महत्त्वं च सर्वेषां सुविदितमेव, अतः छात्रेषु संस्कृतस्य शिक्षणं नितान्तम् आवश्यकम् अस्ति। इति निध्याय एव अस्माकं विद्यालये भूरि विद्यालय-स्तरीयाः प्रतिस्पर्धाः, पुरस्कार-प्रदान-कार्यक्रमाः, छात्रवृत्ति-अनुदानदानादिप्रक्रियाः, सहैव संस्कृतभाषासंरक्षणप्रचारणपराः विविधाः अन्येऽपि कार्यक्रमाः अनुष्ठीयन्ते यत्र छात्राः सोत्साहं भागम् अपि भजन्ते। अस्मिन् एव क्रमे संस्कृतभाषीयपत्रिकायाः प्रकाशनम् अपि संयोज्यते इत्यस्ति महतः हर्षस्य विषयः।
अहं पुनरपि सकृद् विद्यालयस्य संस्कृत-विभागीयान् समर्थशिक्षकान् प्रियछात्रान् च देवभाषायाः संरक्षणार्थं संस्कृतसौगन्धिकापत्रिकायाः प्रकाशनस्य नूतनप्रकल्पस्य प्रारम्भार्थं वर्धापनान्युपाहरामि। अशासे यत् अस्माकं विद्यालयस्य अयं प्रकल्पः आधुनिक-संस्कृत-साहित्य-संवर्धन-संरक्षणमार्गे कोषीयप्रस्तरः सेत्स्यति।

**राष्ट्ररक्षाप्रधानाय कृतज्ञराष्ट्रस्य श्रद्धाञ्जलिः**

**।।वयं तुभ्यं बलिहृताः स्याम।।**

Atharvaveda, 12.1.62

May we offer ourselves for you!





**स्मृतिशेषः**
**राष्ट्ररक्षाध्यक्षः जनरल विपिनरावतः**

## कोविड् सन्देशः

**प्रियाः छात्राः अभिभावकाश्च देशे कोविड-महामारी-संकटम् इदानीमपि पूर्णतो न दूरीभूतम्।**
**भवन्तः प्रार्थ्यन्ते यत् कोविड-सूच्यौषधं अवश्यमेव स्वीकुर्वन्तु, अनवधानतां नैव आचरन्तु।**
**सहैव, सुरक्षायाः उपायत्रयस्य संकल्पं स्वीकुर्वन्तु**

- **मुखावरकं धारयन्तु,**
- **सामाजिक-दूरतां पालयन्तु,**
- **पाणिपादं च यथासमयं प्रक्षालयन्तु,**
- **औषधम् अपि, सावधानता अपि।**



ब्राह्मी X-D



गुनः X-B



काव्या X-B



अस्मिता X-A

# स्वाधीनतायाः अमृतमहोत्सवः



# रहस्यमय: सेंटा



लिली (एका वृद्धा महिला अस्ति।) समीपे एकं पुरुषं दृष्ट्वा अवदत् को भवान् ?
अस्याम् शीतल रात्रौ बहि: क: अस्ति ?
अत्र क: भ्रमति ?
अधुना हिमपात: अपि भवति ।
प्रतीक्षाम् कुरु भवान् ! अहम् आगच्छामि ।
आगच्छतु आगच्छतु भवान्।
अंत: आगच्छतु । स्वागतम् स्वागतम्
कृष्टोफर (पुरुषस्य स्वरे)
अहम् कृष्टोफर नामक: व्यापारी अस्मि। मार्गे हिमपात: भवति । किम् अत्र अद्य रात्रौ स्थातुम् शक्नोमि ?
लिली –अलम् चिंतया । अतिथि देव: भवति । अहम् पूर्णतया जानामि यत् भवान् स्वगृहम् गंतुम् इच्छति ।
किन्तु गृहगमनवेलायाम् मार्गे हिमपात: आरब्ध: ।
चिंताम् मा करोतु । अंत: आगत्य विश्रामम् करोतु। उष्णसूपम् च पिबतु । शिशिररात्रौ उष्णसूप: लाभकर: भवति ।
मम नाम लिली अस्ति । (गृहम् दर्शयति )
अत्र बहव: बाला: निंद्रामग्ना : सन्ति । किंचित्कालपूर्वम् मम पति:स्वर्गम् गत:। अहम् एतेभ्य: बालेभ्य: अनाथाश्रमम् संचालयामि ।
किं पृच्छसि ? अहम् एतेषाम् पालनम् कथम् करोमि ?
आम् ! अहम् वस्त्रसीवनम् कृत्वा जीविकानिर्वाहम् करोमि । तत: यत्किंचिद् धनादिकम् प्राप्यते तेन पोषणम् करोमि । अति कठिनतया एतेषाम् पालनम् करोमि ।
किन्तु अधुना अहम् चिंतयामि यत् – क्रिसमसपर्वणि एकसप्ताह: एव शेष: अस्ति ।
परंतु अहम् चिंतयामि यत् एतेषाम् कृते उपहारम् कथम् नेतुम् शक्नोमि ?
मम गृहम् तु अति लघु अस्ति ।
भवान् अत्र पूर्णविरामं प्राप्नोति वा न इति अहम् न जानामि ।
कृष्टोफर ( पुरुषस्य स्वरे) अहम् भवत्या: अधमर्णतां धरामि । यत् भवती मम अतिसहायताम् अकरोत्। अधुना अहम् गच्छामि ।
( रथं दृष्ट्वा आश्चर्येण )
एतत् किम्? एक: नर: अनेकै: उपहारै: साकम् अत्र आगच्छति?( प्रसन्नो भूत्वा )
किम् एतत् ! (एकम् पत्रम् दृष्ट्वा ) अस्मिन् पत्रे तु मम नाम अस्ति । अहम् पत्रम् पठामि ।(उत्साहपूर्वकं पत्रम् पठति )
आदरणीयलिलीमहोदये !( पुरुषस्य स्वरेण)
भवत्या: बालानाम् पोषणम् कार्यम् अतीव प्रशंसनीयम्। अहम् बालानाम् कृते उपहारान् प्रेषयामि । बालेभ्य: उपहारम् यच्छ । छात्रेभ्य: पुरस्कारा : अवश्यमेव
रोचन्ते । (रहस्यमय सेंटा)
अद्य आरभ्य या: या: सहायता: आवश्यक्य: सन्ति ता: सर्वा: प्राप्यन्ते भवत्या ।
लिली (महिलाया: स्वरे)
श्रुतम् मया यत्! सेंटा सर्वेभ्य: उपहारम् यच्छति। किन्तु अधुना अहम् प्रत्यक्षम् पश्यामि ।
हो हो हो सर्वेभ्य: क्रिसमसपर्वण: मङ्गलकामा: ।



Bal Bharati PUBLIC SCHOOL GANGARAM

# "दूरभाषकासुरः"



मुहुर्मुहुः विलोक्यते किमर्थमत्र कार्टुनम्,
कदा तु पुस्तकस्य दर्शनाय चापि यत्यताम्।
त्वदीयहस्तगं न भाति दूरभाषयन्त्रकम्,
सुते! परामृशामि ते न पश्य दूरभाषकम्।।१

न वेत्सि दूरभाषकं तु नेत्ररोगजं भृशम्,
तथास्ति तस्य दर्शनं स्वचेतना विलोपकम्।
करोषि केवलं वृथा स्वकालयापनं कथम्?
पुनः पुनः प्रबोधितापि नेच्छसीह वेदितुम्।।२

अनारतं हि दूरभाषयन्त्रकेण खेलनम्,
स्वभाव एव तेऽभवत् शृणोषि नैव मातरम्।
ततः कदापि मुक्तये प्रिये! सुते! प्रयत्यताम्,
त्वया न मन्यते किमर्थमत्र मे प्रबोधितम्।।३

यथा यथा स्वभाव एष वर्धते तथा तथा,
विमर्शितुं न शक्यतेऽत्र साध्वसाधुपथ्यता।
न तिष्ठ दूरभाषकेण सर्वदापि योजिता,
हितं भवेत् सुते! यतो भणाम्यहं सदिच्छया।।४

यदात्र दूरभाषयन्त्रवागुरासु पत्यते,
सुबुद्धिरत्र लुप्यते भृशं मनोऽपि भ्रश्यते।
मतिः न निश्चिनोति किं त्वयाधुना विधीयते,
त्यजेः स्वदूरभाषकं प्रणोदयामि हे सुते! ।।५

चिकित्सकैः प्रमाण्यते मृषा न वच्मि साम्प्रतम्,
बहुत्र बोधितापि मन्यते न तद्गभीरताम्।
समस्तलोकतः समागतं समग्रकल्मषम्,
तदत्र दूरभाषकेण नीयते स्व-मानसम्।।६

हृदा सुधारयेः सदा ददामि सन्मतिं शुभे!
न चात्र दूरभाषकेण खेल सर्वदा शुभे!।
प्रयत्यते शुभाय ते न लक्ष्यते कथं सुते?,
विवश्यतां गतासि केन दूरभाषके सुते।।७

निरुद्धदृष्टिरस्ति ते सदैव दूरभाषके,
तदेव रोधने रतोऽस्मि न त्वया निशम्यते।
निपातितासि दूरभाषकासुरेण शैशवे,
निरस्य तत्र रञ्जनं मनः करोतु पुस्तके।।८



# व्यङ्ग्यचित्रेषु संस्कृतम्



भोः! भवतः कृते दूरवाणी। वृन्ताकस्य व्यञ्जनं कथं करणीयम् इति त्वां पृच्छति अस्माकं जामाता। तं बोधय।







वत्स! अन्तर्जालीया कक्ष्या इव अन्तर्जाली
ोपावलिः। यथेच्छं कियन्ति वा स्फोटकानि
वालयतु। नुदति चेत् पर्याप्तम्।





अयि महाभाग! वेतनं वर्धयतु इति भवन्तं प्रार्थयतु इति मम पत्नी मां प्रतिदिनं पीडयति। अस्तु! वर्धनीयम् उत न इति मम पत्नीं पृष्ट्वा वदामि।

मा छिन्द्ध्यस्मदाप्तमित्रं पर्यावरणरक्षकम्।
वप पादपमाप्नुहि ते जीवने नूत्नमित्रम्॥






Bal Bharati PUBLIC SCHOOL GANGARAM
















# जयतु संस्कृतम्

# अस्माकं विजेतार:

| म संख्या | पुरस्कृत: छात्र: | आयोजक: विद्यालय: | कक्षा | पुरस्कार: | प्रतियोगिता |
|---|---|---|---|---|---|
| 1 | अथर्व केशवानी | जीडी गोयनका पब्लिक स्कूल | VII - ई | प्रथम | भिती पत्रिका निर्माणम् |
| 2 | निध्यना सेठी | बाल भारती पब्लिक स्कूल, कुदगी | VII - डी | प्रथम | कथाकथन |
| 3 | निध्यना सेठी | बाल भारत पब्लिक स्कूल, ब्रिज विहार | VII - डी | प्रथम | संभाशन: |
| 4 | अभिलाषा डे | बाल भारती पब्लिक स्कूल, एनटीपीसी | VII - बी | प्रथम | श्लोक उच्चारण |
| 5 | भारवि नायक कलिता | मुंशी मेमोरियल इंटर स्कूल श्लोक गायन | IX - ए | प्रथम | मुंशी मेमोरियल इंटर स्कूल श्लोक गायन |
| 6 | ब्राह्मी देबरानी | बाल भारती पब्लिक स्कूल, रोहिणी | X - डी | द्वितीय | कॉमिक स्ट्रिप |
| 7 | काशवी शर्मा | बाल भारती पब्लिक स्कूल एनटीपीसी कारगोन | VII - ह | द्वितीय | अभिव्यक्ति |
| 8 | जया गुप्ता | बाल भारती पब्लिक स्कूल, गंगाराम | VII - ए | द्वितीय | ग्रंथ स्मृति |
| 9 | विदुर राठी और राशि गोयल | बाल भारती पब्लिक स्कूल, गंगाराम | VIII – डी तथा VII - डी | द्वितीय | मनस |
| 10 | प्रमिति सेठी | बाल भारती पब्लिक स्कूल एनटीपीसी कारगोन | VI - सी | तृतीय | धातु पाठं |
| 11 | अभिलाषा डे | भारतीय विद्या भवन मेहता विदयालय नई दिल्ली | VII - बी | तृतीय | श्लोक उच्चारण |






























Bal Bharati
PUBLIC SCHOOL
GANGARAM

# प्रमाणपत्राणि

Bal Bharati
PUBLIC SCHOOL
NTPC KHARGONE
An Institution of the Child Education Society (Regd.) Delhi

BBPS KGN
Literary Fiesta

*An Inter School Event*
## Certificate of Merit

*This is to certify that Kaashvi Sharma of Class VII, student of Bal Bharati Public School, Ganga Ram Hospital Marg, secured Second position in the event Abhivyakti of Literary Fiesta 2021.*

DR. NEERU TALWAR
PRINCIPAL

Piyush Jain
EVENT COORDINATOR

---

Bal Bharati
PUBLIC SCHOOL
BRIJ VIHAR, GHAZIABAD

BRITISH COUNCIL
INTERNATI
SCHOOL AW
2018–21

## EXPRESSIONS-2021
(A festival of Inter School Events)

### Certificate of Merit

This is to certify that Nidhyana Sethi from Bal Bharati Publi
Ganga Ram participated in Sambhashan event held on 29th and 3
2021.
He/She has obtained 1st position therein.

Pri

---

G.D. GOENKA PUBLIC SCHOOL
ROHINI SECTOR-9
*a brighter future begins today...*

## APPRECIATION CERTIFICATE
**CONGLOMERATE 2021**

**This certificate is proudly presented to**

*Atharva Keswani*

**for securing First Position in भित्ती पत्रिका निर्माणम्**
**held at G. D. Goenka Public School**
**Sector – 9, Rohini, Delhi - 110085**

JULY 20, 2021
DATE

PRINCIPAL

---

Bal Bharati
PUBLIC SCHOOL
NTPC KHARGONE
An Institution of the Child Education Society (Regd.) Delhi

BBPS KGN
Literary Fiesta

*An Inter School Event*
## Certificate of Merit

*This is to certify that Pramiti Sethi of Class VI, student of Bal Bharati Public School, Ganga Ram Hospital Marg ,secured Third position in the event Dhaatu Paath of Literary Fiesta 2021.*

DR. NEERU TALWAR
PRINCIPAL

Piyush Jain
EVENT COORDINATOR

---

Bal Bharati
PUBLIC SCHOOL
Sector-14, Rohini
An Institution of the Child Education Society (Regd.) Delhi

## EXPLORIKA- 2020
(Beyond Classrooms)

*Awarded to* **Brahmi Debrani**
*of* **Bal Bharati Public School, GRH Marg** *school*
*for participating / securing* **Second Position**
*in* **COMIC STRIP**
*held on* **25th August 2020**

NPSC

*Principal*

---

BAL BHARATI PUBLIC SCHOOL, KUDGI

ZESTHALON - 2020

CERTIFICATE OF ACHIEVEMENT

Awarded to NIDHYANA SETHI of CLASS VI of BAL BHARATI PUBLIC SCHOOL, NEW DELHI for achieving FIRST position in the event कथाकथन of Zesthalon 2020, Conducted by Bal Bharati Public School, Kudgi on 10th Dec 2020.

His / Her Zeal and enthusiasm is appreciable.

Date: 18/01/2021

In-charge / Coordinator

# राष्ट्रियसञ्चारमाध्यमेषु अस्माकं वार्ता:













संस्कृत-संवादः (पाक्षिकः) देहली

## बालभारतीपब्लिकस्कूल इति विद्यालयद्वारा संस्कृतभाषासंवर्धनपरा अन्तर्जालीया सङ्गोष्ठी समनुष्ठिता

नवदिल्ल्याः गंगाराम-चिकित्सालय-मार्गस्थितेन बालभारती पब्लिक स्कूल इत्याख्यस्य प्रशासनेतर विद्यालयस्य संस्कृतविभाग द्वारा दिसम्बर पञ्चविंश्यां छात्रान् संस्कृताध्ययनम् प्रति प्रेरणार्थं मार्गदर्शनपरः अन्तर्जालीयः व्याख्यानकार्यक्रमः भव्यतया समायोजितः। एषः कार्यक्रमः प्रधानाचार्यस्य श्री एल. वी. सहगलवर्यस्य नेतृत्वे, उपप्रधानाचार्यायाः श्रीमत्याः मीनामल्होत्रायाश्च प्रेरणया छात्रेभ्यः अभिभावकेभ्यश्च समायोजितः। कार्यक्रमस्य प्रारम्भः संगीतविषयस्य अध्यापकेन श्री सुमनझामहोदयेन प्रस्तुत




मंगलाचरणेन विहितः। विद्यालयस्य माध्यमिकविभागस्य मुख्याध्यापिका पूनम सौंधी वर्या अभ्यागतानाम् अतिथिजनानां वाचिकं स्वागतं सत्कारं च कृतवती।

अस्मिन् अन्तर्जालीय-व्याख्यान-कार्यक्रमे मुख्य-वक्तृरूपेण समागतेन प्रसिद्धयुवामनीषिणा, लोकप्रिय-प्रेरकवक्त्रा, प्राच्यविद्यानुसन्धात्रा संस्कृतचलचित्रस्य शाकुन्तलम् इत्यस्य निर्मात्रा निर्देशकेन दुष्यन्तश्रीधरेण विद्यालयस्तरे छात्राणां मासेषु संस्कृतभाषायाः संवर्धनं कथं भवेत् इति विषये सार्गर्भितं व्याख्यानं प्रदत्तम्, अमुना छात्राः संस्कृतविषयं पठितुम् अपि प्रेरिताः। असौ प्रवोचत् यत् संस्कृतभाषा सर्वासां इण्डोयूरोपीय-भाषाण जननी वर्तते। सहैव एषा भाषा अतिशय सरला भाषा अस्ति। संस्कृतस्य अधि कांश-शब्दाः अस्माभिः दैनन्दिनजीवने प्रयुज्यन्ते। यदि एषा भाषा अस्माक व्यवहारभाषा भवति चेत् तन्निभा कठिना नैव प्रतीता भविष्यति। प्रायः सर्वासु भाषासु संस्कृतमूलकाः प्रचुराः शब्दाः सन्ति विद्यमानाः। कार्यक्रमे द्वितीय-मुख्य-वक्तृरूपेण उपस्थितः आसीत् हरियाणायाः ऋषिहुड विश्वविद्यालयस्य राष्ट्रम् स्कूल ऑफ लीडरशिप इत्यस्य आचार्यः प्रोफेसर श्रीसम्पदानन्दमिश्रमहोदयः। प्रोफेसर सम्पदानन्द महोदयेन संस्कृतसंवर्धनविषये छात्राणां दृशा मनोरमशैल्या गम्भीरतया च व्याख्यानं दत्तम्। अमुना भणितं यद् इतरभाषाध्येतारो जनाः केवलम् तद् विषयमेव पठन्ति, तत्रैव संस्कृत-भाषायाः अध्येतारः सर्वान् विषयान् पठन्ति। संस्कृतमेव तादृशः एकः विषयः अस्ति यस्मिन् योग-आयुर्वेद-नाट्य-वेदान्त-व्याकरण-साहित्य-खगोल-भूगोलश्चेत्यादिविषयाः पारेसहस्रं वर्षेभ्यः भारते पापठ्यते। असौ न्यगादीत् यत् संस्कृतस्य अध्येता जीवनकलाभिः अवगतो भवति, येन सः न कदापि अवसादग्रस्तो जायते अपि तु सर्वदा आनन्दितः तिष्ठति। सम्प्रति तु संगणकम् अपि संस्कृतेन संयोजितम् अस्ति। अस्मिन् प्रसङ्गे अमुना देश-विदेशेषु संस्कृताध्यायनरताः निजशिष्याश्चापि उल्लेखिताः ये खलु संस्कृतभाषायाः प्रचार-प्रसार-कर्मसु संलग्नाः सन्ति। तृतीयवक्तृ-रूपेण दूरदर्शनाकाशवाण्योः पत्रकारः, स्वस्तिवाचन-संस्थायाश्च महासचिवः श्रीसुनीलजोशीमहोदयः उपातिष्ठत। अमुना छात्रप्रेरणापरकस्य अस्य मार्गदर्शन-व्याख्यान-कार्यक्रमस्य भूरि भूरि प्रशंसा विहिता। सहैव विद्यालयस्य प्रधानाचार्यस्य श्री एल. वी. सहगलस्य विषये प्रोक्तं यत् संस्कृतस्य समुन्नयने शिक्षासंवर्धने छात्रप्रेरणाक्षेत्रे अद्वितीयकार्य करणार्थम् सहगलमहाभागः पद्मश्रीसम्मानयोग्यः अस्ति। युगपदेव असौ बालकान् विभिन्न-उदाहरणान माध्यमेन संस्कृतपठनार्थं प्रेरिताः। जोशीवर्येण कार्यक्रमस्य आयोजकानाम् अधिकारिणां शिक्षकानां चापि श्लाघावचोभिः उत्साहवर्धनं कृतम्

कार्यक्रमस्य सफलसञ्चालनम् अतिथिपरिचयप्रदानं च श्रीमती ज्योत्स्ना श्रीवास्तवमहोदया कृतवती। कार्यक्रमस्य समग्रा व्यवस्था, धन्यवादज्ञापन

Bal Bharati
PUBLIC SCHOOL
GANGARAM

# छात्रसम्पादका:



गुनः अग्रवालः
X-B



स्वास्तिकः जैनः
X-D



ब्राह्मी देबरानी
X-D



नव्या भारद्वाजः
VIII-B



पुष्करः अग्रवालः
VIII-B



आरवः पराशरः
VII-C





# सम्पादकत्रय्या: वक्तव्यम्



“ संस्कृत भाषा न केवलं भूषिता सा भूषयत्यपि भाषकान्“ कालिदासस्य एषा उक्ति: सत्यम् अस्ति। अस्माकं प्रेरणापुंजप्रधानाचार्यमहोदयस्य मार्गदर्शनेन संस्कृतस्य बहुप्रतीक्षिता विभागीया पत्रिका “संस्कृतसौगंधिका” भवतां समक्षं प्रस्तुतम् अस्ति। कोविड-महामारी-संकटकाले छात्रै: शिक्षण-प्रविधि-माध्यमेन अनेका: महत्वपूर्णा: उपलब्धय: प्राप्ता:। छात्रा: टंकणमाध्यमेन देवनागरीलिपे: अनेकान् लेखान् अपि अलिखन् गतिविधीन् च अकुर्वन्। एतत् मम विश्वास: अस्ति यत् छात्रेभ्य: एषा पत्रिका निश्चितरुपेण रुचिकरं,ज्ञानवर्धकं च भविष्यति। अथ तेभ्य: प्रोत्साहनमपि प्रदास्यति । एषा पत्रिका नवीनशिक्षानीते: अनुसारेण दैशिकभाषाणाम् उत्थानाय अपि महत्वपूर्णम् सोपानम् भविष्यति। सर्वत्र सर्वदा च वर्धताम् अस्या: संस्कृत-सौगन्धिकाया: सुगन्ध:।

**डॉ . ज्योत्स्ना श्रीवास्तव**



**श्रीयुवराज: भट्टराई**

आदरणीया: विद्वज्जना:!
बाल भारती पब्लिक विद्यालये संस्कृतसहितानां सर्वासां भारतीयभाषाणामुन्नते: उपाया: नैकस्तरेषु विधीयमाना: सन्ति। अस्मिन्नेव क्रमे संस्कृतसौगन्धिका पत्रिकाया: शुभारम्भ: अपि अस्यां दिशि महत्त्वपूर्ण: उपक्रम: अस्ति। संस्कृते स्तरीयतामानेतुं छात्रान् संस्कृतम् प्रति सम्प्रेरयितुं विद्यालयस्येयं पत्रिका संस्कृतसौगन्धिका एक: नवीन: प्रयास: अस्ति। प्रथमाङ्कस्य दृष्ट्यापि अस्मिन् अङ्के उच्चकोटिकाभि: पठनीयसामग्रीभि: साकम् आकर्षकप्रस्तुते: दृशापि अभूतपूर्वा: विषया: समावेशिता: सन्ति। एतादृशीभि: विविधसामग्रीभि: परिपूर्णामेतां पत्रिकां भवतां करकमलेषु समर्पयन्त: अत्यन्तमेव प्रसन्नतामनुभवामो वयम्। अथ चास्या: पत्रिकाया: प्रकाशनावसरे विद्यालयस्य प्रधानाचार्याय श्रीयुत एल.वी. सहगलवर्याय, उपप्रधानाचार्यायै श्रीमत्यै मीना मल्होत्रावर्यायै च अहं कृतज्ञतावचनानि समर्पयामि ययो: सफलनेतृत्वे मार्गदर्शने च वयं सर्वे शैक्षिकगतिविधीन् सुष्ठुतया सुकरतया च सम्पादयन्त: स्म:।
आशासे यत् विद्यालयस्य एषा संस्कृतसौगन्धिका पत्रिका संस्कृतभाषाया: माध्यमेन प्रकाश्यमानासु विद्यालय-स्तरीयपत्रिकासु सर्वाधिका प्रतिष्ठिता पत्रिका भविष्यति।



धन्योऽयं भारतदेश: यत्र समुल्लसति जनमानसपावनी, भव्यभावोद्भाविनी, शब्द-सन्दोह-प्रसविनी सुरभारती। विद्यमानेषु निखिलेष्वपि वाङ्मयेषु अस्या: वाङ्मयं सर्वश्रेष्ठं सुसम्पन्नं च वर्तते। इयमेव भाषा संस्कृतनाम्नापि लोके प्रथिता अस्ति। अस्माकं रामायण-महाभारताचैतिहासिकग्रन्था:, चत्वारो वेदा:, सर्वा:, उपनिषद:, अष्टादशपुराणानि, अन्यानि च महाकाव्यनाट्यादीनि अस्यामेव भाषायां लिखितानि सन्ति। इयमेव भाषा सर्वासामार्यभाषाणां जननीति मन्यते भाषातत्वविद्भि:। संस्कृतस्य गौरवं बहुविधज्ञानाश्रयत्वं व्यापकत्वं च न कस्यापि दृष्टेरविषय:। संस्कृतस्य गौरवमेव दृष्टिपथमानीय सुम्यगुक्तमाचार्यप्रवरेण दण्डिना -संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभि:। अस्माकं छात्रा: संस्कृतभाषामुत्साहेन पठन्ति ।संस्कृतस्य सर्वा: गतिविधिय: गौरवेण आचरन्ति । सर्वेभ्यो छात्रेभ्य: मम साधुवाद: । धन्यवाद:, जयतु संस्कृतम् जयतु भारतम्I

**डॉ. वीरेन्द्र कुमार**